त्रिधा वितुषीकृतान् कण्डनप्रस्फोटनाभ्यामिति शेषः। पवित्रान्तर्हितान् पवित्रम् अन्तर्हितं व्यवहितं येषां तान्। तेन चरुस्थाल्यामुत्तराग्रं पवित्रं निःक्षिप्य तण्डुलान् निक्षिपेत्। कुशलशृतमिवेति कुशलेन पाकनिपुणेन शृतं यथा न दग्धं नातिक्लिन्नं न मन्दपक्वं यथा स्यात्तथा स्थालीपाकं श्रपयेत्। अतएव छन्दोगपरिशिष्टम्। "स्वशाखोक्त्या चरुः स्विन्नो ह्यदग्धोऽकठिनः शुभः। न चातिशिथिलः पाको न च वीतरसो भवेत्"। वीतरसोगालितमण्डः। प्रदक्षिणमुदायुवन्निति प्रदक्षिणावर्त्तं यथा स्यात्तथा मेक्षणेन ऊर्द्ध्वमीषन्मिश्रयन्। यु मिश्रणे इत्यस्य रूपमेतत्। शृतमित्यभिघार्य्येति स्फुटितम्। चरुमाज्यस्रुवेणाप्लाव्य उदगग्नेरुत्तरस्याम् उत्तार्य्य प्रत्यभिघारयेत् पुनर्घृतेन तथा सेचयेत्। दृषोत्सर्गे तु अभिघारणद्वयात् पूर्वं ज्वलदङ्गारेण विद्योतनद्वयमाह छन्दोगपरिशिष्टम् "अधिश्रितमवद्योत्य सुशृतञ्चाभिघारयेत्। घृतेन सेचयेत् पश्चात् पुनरेवाभिघारयेत्"। मेक्षणादीन्याह छन्दोगपरिशिष्टम् "इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्। वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्"। इध्मार्द्धप्रमाणं प्रादेशद्वयमिध्मस्य प्रमाणं परिकल्पितमिति तदर्द्धम् एवैव दर्वी विशेषस्तु महार्णवे। "दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयेण तु मेक्षणम्। मुषलोदूखले वार्क्षे स्वायते सुदृढे तथा। इच्छाप्रमाणे भवतः शूर्पं वैणवमेव च"। अत्र तिर्य्यगूर्द्ध्वमित्यादि वैणवमेव चेत्यन्तेन चर्वङ्गमभिधाय भूमिजपपरिसमूहनहस्तविन्यासं कुर्य्यादित्युक्तम्"।

स्थाल्यां पाकपात्रे पाकः पच्यमानः। २पाकभाजने पच्यमाने। चातुर्मास्यादौ तत्त्यागे फलं ति॰ त॰ दर्शितं "लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन्"।

**स्थालीपुलाक** पु॰ स्थाल्याः पुलाकास्तण्डुलाः सन्त्यत्र एकधर्म्मतोन्नायकत्वेन अच्। मीमांसकोक्ते "स्थाली-स्थास्तण्डुला एते सर्वे विक्लृत्तिभागिनः। समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत्" इत्यनुमानकल्पके न्यायभेदे यथा एकस्य पाकदर्शनेन अन्येषां पाकज्ञानम् एवं एकरूपाणां सर्वेषामेकधर्म्माक्रान्तत्वमित्येवंरूपोद्भावनम्।

**स्थालीबिल** न॰ इत॰। स्थाल्याः शून्यभागे तदर्हति छ यत् वा। स्थालीबिलीय (ल्य) तण्डुलादौ त्रि॰ सि॰कौ॰।

**स्थालीवृक्ष** पु॰ स्थाल्यै-वृक्षः। १अश्वत्थाकारे स्थालीनिर्माणसाधने २वृक्षभेदे। "स्थालीवृक्षो लघुः स्वादुस्तुवरस्तिक्त उष्णकः। कटुपाकरसः ग्राही विषपित्तकफापहृत्" भावप्र॰

**स्थावर** त्रि॰ स्था-वरच्। १अचले २स्थिरे दृक्षादौ ३स्थादौ च अमरः। "स्थावरं जङ्गमञ्चैव यद्यपि स्वयमार्जितम्" स्मृतिः। ३पर्वते पु॰ ४धनुर्गुणे न॰ त्रिका॰। स्थावरसर्गश्च षड्विधः सर्गशब्दे ५२५० पृ॰ दृश्यः। स्थावरधनं च सन्निकृष्टे क्रेतरि सति असन्निकृष्टाय न विक्रेयं यथोक्तं महानिर्वा॰१२प॰। "स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्त्तिनि। योग्ये क्रेतरि विक्रेतुं न शक्तः स्थावराधिपः। सान्निध्यवर्त्तिनां जातिः सवर्णो वा विशेष्यते। तयोरभावे सुहृदो विक्रेतिच्छा गरीयसी। निर्णीतमूल्ये पण्येन स्थावरस्य क्रयोद्यमे। तन्मूल्यञ्चेत् समीपस्थो राति क्रेता न चापरः। मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽपि वा। सन्निधिस्थस्तदान्यस्मै गृही शक्नोति विक्रये। क्रीतञ्चेत् स्थावरं देवि! परोक्षे प्रतिवासिनः। श्रवणादेव तन्मूल्यं दत्त्वाऽसौ प्राप्तुमर्हति। क्रेता तत्र गृहारामान् विनिर्माति भुनक्ति वा। मूल्यं दत्त्वाऽपि नाप्नोति स्थावरं सन्निधिस्थितः। "स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया" स्मृतिः। स्थावरस्य केवलविक्रयनिषेधात् विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण विक्रयः कर्त्तव्य इति" मिता॰। "एकोऽपि स्थावरे कुर्य्यात् दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः" स्मृतिः। "संविभागक्रयप्राप्तं पित्र्यं लब्धञ्च वान्यतः। स्थावरं सिद्धिमाप्नोति भुक्त्या, हानिरुपेक्षया"। "सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्। विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि" कात्या॰। "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि च। सा यथाकाममश्नीयात् दद्याद्वा स्थावराद्दृते" नारदः। "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्। विभक्तं स्थावरं याह्यं नान्योदर्य्यैः कथञ्चन" यमः। "सर्वेषां तुल्यरूपाणां सोदरासोदराणामिति" श्रीकृष्णः। [राजनि॰ २स्थावरप्रभृतौ त्रि॰।

**स्थावरादि** पुं न॰ स्थावरमादिर्हेतुर्यस्य। १वत्सनाभविषे

**स्थाविर** न॰ स्थविरस्य भावः अण्। वृद्धत्वे अमरः। तच्च सप्ततिवर्षोपगमे भवति "आषोडशात् भवेद्बालस्तारुणस्तत उच्यते। वृद्धः स्यात् सप्ततेरूर्ध्वं वर्षीयान् नवतेः परम्" स्मृतिः। [अमरः २जलबुद्बुदे च मेदि॰।

**स्थासक** पु॰ स्था-स-स्वार्थे क। १अलङ्कारे २चार्चिक्ये

**स्थास्नु** त्रि॰ स्था-स्नु। १स्थितिशीले अमरः "च्युतादिवः स्था-